International Journal of Pharmaceutical research and Applications
Volume 11, Issue 3, May-June2026, pp:1949-1954 www.ijprajournal.com ISSN:2456-4494

चलदूरवाणीखण्डकाव्यदिशा दूरवाणीप्रयोगस्य सुफलानि कुफलानि च - एकमध्ययनम्

तन्मयविश्वासः
अनुसन्धाता, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

Date of Submission: 10-06-2026 Date of Acceptance: 20-06-2026

शोधसारः

अस्मिन् शोधनिबन्धे चलदूरवाणी किम्? तस्याः प्रभेदाः, कुत्र कुत्र व्यवह्रियते, अत्यधिकव्यवहारेऽसौविध्यं, यथार्थोपयोगे सौविध्यमित्यादयः नैके विषयाः उदाहरणपुरस्सरं चर्चिताः सन्ति। कथं तदेव यन्त्रस्यास्माकं जीवनेऽङ्गाङ्गिभावः जायते तत्त्विह शोधपत्रे प्रदर्श्यते यथाग्रन्थम्। अनियमानुगुणं तस्य यन्त्रस्य व्यवहारे यूनामुपरि ये दुष्प्रभावाः आपपन्ति तेषां समेषां सङ्कलनमिह समासेन क्रियते मया।

कुञ्जी शब्दाः (key words)

चलदूरवाणी, तस्याः उपयोगस्य प्रसारः, जनप्रियतायाः प्रमुखकारणानि, हानिकारकप्रभावाः, तस्याः उपयोगे सुफलानि कुफलानि चेत्यादयः।

प्रस्तावना

आधुनिकप्रोद्योगिक्याः नवीनतमाः आविष्काराः अन्तर्जालः, ई-मेलः, चलदूरवाणी च सन्ति। संचारस्य साधनमेकं भवति चलदूरवाणी। अद्यत्वे कुटुम्बाय, मित्राय, अन्यस्मै वा प्रेषितपत्रस्य प्रत्युत्तरं ज्ञातुं सुदीर्घकालं यावत्प्रतीक्षा न क्रियतेऽस्माभिः। यतो ह्यस्य लघु-तारहित-मोबाईल-यन्त्रस्य माध्यमेन वयं स्वदेशे विदेशे च जनानां साकं क्षणमात्रेण सहजतया संवादं कर्तुं शक्नुमः, सर्वविधवार्तानाम् आदानप्रदानं च कर्तुं शक्नुमः। विगतेषु वर्षेषु एतल्लघुयन्त्रम् अस्माकं जीवनस्याभिन्नं भागं जातम्। वयम् अस्माकं चलदूरवाणीं विना एकं क्षणम् अपि व्यतीतुं न शक्नुमः।

चलदूरवाण्याः उपयोगस्य प्रसारः :

चलदूरवाण्याः उपयोगः अधुना व्यापकः अस्ति। समाजे उच्च-मध्यम-नीच-वर्गेषु सर्वेषु परिवारेषु चलदूरवाण्याः प्रयोगः प्रसृतः अस्ति। एतत् यन्त्रं न्यूनमूल्येन उपलभ्यते, तत्राधिकमूल्यीयं दूरवाणीयन्त्रमपि अस्ति। स्वल्पमूल्यीया दूरवाणी आकर्षकशर्तेषु च उपलभ्यते इति कारणतः सर्वेषां वर्गानां जनाः अस्य उपयोगं कुर्वन्ति। विशेषतः वर्तमानबालपीडीष्वस्याकर्षणमप्रतिरोध्यं जातम्। भविष्यति अस्याः उपयोगः इतोऽपि अधिकतया वर्धते इति समेषां मतम्।

चलदूरवाण्याः जनप्रियतायाः प्रमुखकारणानि

चलदूरवाण्याः जनप्रियतायाः नैकेषां कारणानां मध्ये सर्वाधिकानि महत्त्वपूर्णानि कारणानि—

- प्रथमम् - चलदूरवाण्याः द्रुतसञ्चारव्यवस्थायाः कारणाल्लोकप्रियता प्राप्ता अस्ति। यतः न्यूनमूल्येन दूरवाणीं क्रेतुं शक्नुवन्ति, अतः सर्वे जनाः तस्याः उपयोगं कर्तुं शक्नुवन्ति।
- द्वितीयम् - भवन्तः सर्वे सर्वत्र स्वस्य चलदूरवाणी स्वेन सह नीत्वा सर्वत्र अत्यन्तं सुलभतया उपयोक्तुं शक्नुवन्ति।
- तृतीयम् - एस्.एम्.एस् इत्यनेन स्वल्पव्ययपूर्वकं ग्राहकः आत्मीयपरिजनस्य वन्धुवान्धवस्य च सविधे काञ्चित् वार्तां प्रेषितुं शक्नोति।
- तुरीयम् - गेहाचला इति एक वैज्ञानिकयन्त्रविशेषा, यस्याः व्यवहारः अतीव व्ययबहुलो भवति। परन्तु अधुना चलदूरवाणीव्यवहारेणैव तस्य यन्त्रस्य व्यवहारः न्यूनीभवति।
- पञ्चमम् – कस्मिन्नपि आरक्षाधिकृतस्यानुसन्धाने चलदूरवाण्याः प्रायशः उपयोगो भवति।

International Journal of Pharmaceutical research and Applications
Volume 11, Issue 3, May-June2026, pp:1949-1954 www.ijprajournal.com ISSN:2456-4494

अपराधिभिः व्यवहृतायाः दूरवाण्याः कालसूचीं पश्यन् अन्येषां शङ्कितानामपि नामानि ज्ञातुं शक्यन्ते। अधुना कस्यापि अपराधिकानुसन्धानस्य कृते चलदूरवाणीति अत्यावश्यकं साधनमस्ति।

- षष्ठम् - सम्प्रति विविधविषयानां सूचना, दैनिकवार्ता, आकाशवाणी (एफ.एम्.रेडियो), छायाचित्रयन्त्रम् (कैमरा) इत्यादयः विविधाः विषयाः चलदूरवाणीष्वुपलभ्यन्ते। चलदूरवाणी न केवलम् आवश्यकतां पूरयति, अपितु मनोरञ्जनस्य महत् साधनमपि अस्ति।
- सप्तमम् - चलदूरवाणीद्वारा स्वल्पसमये कुत्रापि चित्रम्, किमपि कार्यक्षेत्रे न्यायालयक्षेत्रे विज्ञप्तिः ज्ञापनपत्राणि चेति विविधान् विषयान् अतीव सहजतया प्रेषयितुं शक्नोति। कालेऽस्मिन् इयं प्रक्रिया अतीव जनप्रियता प्राप्यते।

चलदूरवाण्याः उपयोगस्य हानिकारकप्रभावाः —

यद्यपि चलदूरवाण्याः उपयोगः सभ्यजीवनस्य अत्यावश्यकः भागः अभवत् तथापि तस्याः दोषाः अपि सन्ति। मात्राधिकं वार्तालापं चलदूरवाण्याः उपयोगः वा न हितकरः। अधुना अष्टाशीतिवर्षपर्यन्तं सर्वे चलदूरवाण्याः व्यसनं कुर्वन्ति, यत् सम्यक् नास्ति। अस्माभिः एतस्य विषये अवधानं दातव्यम्। युवानः चलदूरवाणीषु प्रलापं वक्तुं, एस.एम.एस.-प्रेषितुं, क्रीडितुं, विविधप्रकाराश्लीलचित्रं वा द्रष्टुं प्रवृत्ताः सन्ति, ते तु यौवनं व्यसनवत् सेवितवन्तः सन्ति। ते कस्यापि वचनं श्रोतुं न पारयन्ति यतः तेषां कर्णे चलदूरवाण्याः रज्जुः लसत् अस्ति, तेषु प्रमत्ताः सन्ति। पुनः ये जनाः दूरभाषेण वार्तालापं कुर्वन्त मार्गं लङ्घयन्ते सति मार्गे ध्यानं न ददति, तेषां बहुषु प्राणाः अकाले नष्टाः जाताः। बहवः जनाः वाहनचालनकाले स्वस्य दूरवाण्यां वार्तालापं कुर्वन्ति, येन दुर्घटनाः भवन्ति, अन्येषां बहूनां संकटं जनयन्ति च। वैज्ञानिकाः एकं अध्ययनं कृतवन्तः यत् चलदूरवाण्याः अतिप्रयोगेण मस्तिष्कस्य कर्करोगः भवितुम् अर्हति इति ज्ञायते।

श्रीराधाकान्तठाकुरकृतचलदूरवाणीदिशा सामाजिकक्षेत्रे चलदूरवाण्याः सुफलानि कुफलानि चेति विषयाः मया यथामति आलोच्यन्ते—

चलदूरवाण्याः सुफलानि

चलदूरवाण्याः उपयोगस्य बहूनि सुफलानि सन्ति। अनया सहजतया संवादं कर्तुम्, किमपि मानचित्रं द्रष्टुम्, चित्रं ग्रहितुं, चलचित्रं निर्मातुम् द्रष्टुञ्च, संगीतं श्रोतुम्, आवश्यकानि सूचनानि अन्वेष्टुं शक्यन्ते। अधः चलदूरवाणी इत्यस्याः सुफलानि यथामति मया आलोच्यन्ते—

क. योगायोगः

चलदूरवाणी अत्यावश्यकसञ्चारणयन्त्ररूपेण स्थापिता, यन्मानवानां संवादस्य आदानप्रदानमार्गं पूर्णतया परिवर्तयति। एनया परिवारेण, मित्रेण, सहकारिभिश्च साकं झटिति सम्पर्कः स्थाप्यते। चलदूरवाण्याः उपयोगेन संचारस्य महत्युन्नतिः अभवत्। इतः परं लिखितपत्राचारप्रेषणस्य आवश्यकता नास्ति यतो हि इदानीं दूरवाण्यैव सर्वं सम्भवति। उपयोक्तार एतस्याः चलदूरवाण्याः उपयोगं कर्तुं शक्नुवन्ति। चलदूरवाणी अपि उपयोक्तृणां निकटतमः मित्रम् अस्ति, यतः तेषां चलदूरवाणीषु कतिपयैः क्लिकैः दूरतः प्रियजनाः सन्देशमाध्यमेन सहजतया तेषां समीपम् आनेतुं शक्यन्ते स्म। श्रीराधाकान्तठाकुरकृतचलदूरवाणीखण्डकाव्ये प्रसङ्गेऽस्मिन् विद्यते यत्—

आषाढमासश्च नवीनमेघः
प्रतीक्षितो वर्षमितश्च कालः।
अनुक्षणं प्रत्यहमेव चाद्य
यक्षो विधत्ते चलदूरवाणीम्[1] ॥ इति ॥

ख. शिक्षा

शिक्षाक्षेत्रेऽपि चलदूरवाण्याः विविधं सौविध्यं विद्यते। यथा— E-learning, Online Course, Educational App Download, Educational Content Download, Different Language Learning Translation इत्यादयः सन्ति। एतदतिरिक्तं स्मार्टफोन् शिक्षाक्षेत्रे Internet Browsing इत्यादिषु विविधेषु शैक्षिककार्येषु छात्राणां सहायतां करोति। श्रीराधाकान्तठाकुरकृतचलदूरवाणीखण्डकाव्ये प्रसङ्गेऽस्मिन् विद्यते यत्—

शिक्षाभियानैर्नवयोजनाभिः
क्रियाकलापैर्विविधैश्च सर्वैः।
उन्नीयते सम्प्रति भारतेऽस्मिन्

1 चलदूरवाणी.-१२४

International Journal of Pharmaceutical research and Applications
Volume 11, Issue 3, May-June2026, pp:1949-1954 www.ijprajournal.com ISSN:2456-4494

रिक्तोदरो रिक्तकरो न दृष्टौ[2] ॥ इति ॥

पुनश्च -

विद्यालये नैव पठन्ति शिष्याः
अटन्ति गायन्ति नटन्ति नित्यम् ।
गुरोः सकाशाच्च पठन्ति गेहा-
दालम्ब्य हस्ते चलदूरवाणीम्[3] ॥ इति ॥

इतोऽपि शिक्षायां चलदूरवाण्याः विविधाः उपयोगाः दरीदृश्यन्ते। शिक्षाविषये यथा—

- अन्तर्जालः तथ्यभान्डारः अस्ति। छात्राः स्वीयचलदूरवाण्यामन्तर्जालमाध्यमेन बहु ज्ञानं प्राप्तुं तथ्यानां च संग्रहीतुं शक्नुवन्ति।
- चलदूरवाण्याः उपयोगेन छात्राः सहजतया Online इति मध्ये ज्ञानं प्राप्तुं शक्नुवन्ति, यत् E-Learning इति प्रसिद्धमस्ति।
- छात्राः चलदूरवाण्याः Play store इति स्थानात् विविधानि शैक्षिकमूलकानि Learning App Download इति कृत्वा अतिरिक्तं ज्ञानं प्राप्तुं समर्थाः सन्ति।
- सामाजिकमाध्यमेन छात्राः कदापि शिक्षकैः सह वार्तालापं कृत्वा सूचनानाम् आदानप्रदानं कर्तुं शक्नुवन्ति।
- छात्राः देशान्तरस्य भाषाः अन्तर्जालद्वारा शिक्षितुं शक्नुवन्ति, भाषाणाम् अनुवादं कर्तुं च समर्थाः भवन्ति।
- शिक्षायां चलदूरवाण्याः उपयोगस्य कारणादधुना विविधानां परीक्षानां परिणामान् अन्तर्जालद्वारा द्रष्टुं शक्नोति।

ग. सामाजिकः माध्यमः

बहवः जनाः जीवनयापनार्थं वा सभ्यम् आयं प्राप्तुं वा सामाजिकमाध्यममज्ञानाम् उपयोगं कुर्वन्ति। अद्यत्वे यथा वयं जानीमः तथा सामाजिकमाध्यमाः केवलं चलदूरवाण्यामुपस्थित्यैवास्तित्वं प्राप्तवन्त इति स्मर्तव्यम्। सङ्गणके अन्तर्जालसम्पर्कं विना दूरवाण्यां सामाजिकमाध्यमेन सूचनानां चलचित्राणां निर्माणादिकं सर्वं पूर्वम् असम्भवकार्यं इदानीं सर्वमनायासेन भवति।

घ. मनोरञ्जनस्य स्रोतः

चलदूरवाणीषु वयं विविधप्रकारस्य मनोरञ्जनस्य आनन्दं लब्धुं शक्नुमः। यथा— सङ्गीतं श्रवणम्, चलचित्रं दर्शनम्, क्रीडाप्रतियोगितादिकं दर्शनञ्चेत्यादयः दूरवाण्या सम्भवति। अस्माकम् अवसरसमयम् अधिकम् आनन्ददायकं करोतीयम्। तदुक्तम्—

वाणीविलासेन मनो विनोद्य
नेयोऽस्ति कालो हि यदा सुखेन।
हर्षप्रकर्षेण विना श्रमेण
श्रेया तदानीं चलदूरवाणी[4] ॥ इति ॥

ङ. व्यवसायस्य कार्यस्थलस्य च विस्तारः

चलदूरवाणी व्यवसायक्षेत्रे कार्यस्थले च संचारं सहकार्यं च वर्धयितुं साहार्य्यं करोति। व्यवसायिकग्राहकैः सह संवादं कर्तुं, सभासु, गोष्ठीषु च उपस्थितिं दूरस्थकर्मकारिभिः सह सहकार्यं कर्तुं च अस्य उपयोगः कर्तुं शक्यते। विषयेऽस्मिन् दरीदृश्यते यत्—

श्रेष्ठी स्वर्गहाच्च पणिं विशालां
गुरुः सुदूराद्विदधाति पाठम्।
पर्यङ्कतो वा निजगेहतो वा
कार्यं विधत्ते तु पदाधिकारी[5] ॥ इति ॥

अतएव अध्यापकः तदीयाध्यापनकार्यम्, व्यवसायिकः तदीयव्यापारम्, क्रेता तदीयेच्छानुसारं वस्तु क्रयञ्चेत्यादीणि कार्याणि कर्तुं शक्नोति गृहे उपविश्य।

च. समाजसेवा तथा जीवनस्य गुणवत्तायाः परिवर्तनम्

समाजसेवायां विकासकार्ये च चलदूरवाण्याः महत्त्वपूर्णा भूमिका विद्यते। स्वास्थ्यसेवाप्रदानेषु शिक्षायां च अस्याः उपयोगः कर्तुं शक्यते।

छ. सर्वकारीयसेवासु प्राप्तिः

चलदूरवाणी सेवानां वितरणं सुलभं साश्रयी च करोति। सर्वकारीयसेवासु प्रवेशाय अभियोगप्रदा सर्वकारेण साकं योगायोगाय च अस्याः उपयोगः कर्तुं शक्यते।

2 चलदूरवाणी.-१०३
3 चलदूरवाणी.-११९
4 चलदूरवाणी.-३५
5 चलदूरवाणी.-८३

International Journal of Pharmaceutical research and Applications
Volume 11, Issue 3, May-June2026, pp:1949-1954 www.ijprajournal.com ISSN:2456-4494

ज. शान्तिप्रदानं शान्तिरक्षणञ्च

अस्माकं प्रत्येकस्य जीवने सुखं दुःखम् अवसादं च नित्यं परिभ्रमति। एतादृशाः जनाः न परिदृश्यन्ते, येषां जीवनचक्रे सुखदुःखस्य चक्रमिदं न विद्यते, यतोहि सुखं दुःखम् अवसादं च परस्परं परिपूरकम्। सुखं भवति चेत् दुःखम् अवश्यमेव भविष्यति। यदा वयं दुःखान्विताः निराशासमन्विताः वा भवामः, तदा केऽपि जनाः अस्मान् दुःखत्वात् शान्तिं दातुं न शक्नुवन्ति। तदा केवलं दूरवाणी एव मित्रवत् अस्माकम् आत्मानं प्रति शान्तिसन्देशं प्रेषयति। उक्तं यत्—

यदा कदाहं पतितोऽस्मि दुःखे
गर्तेऽथवा भग्नमनोरथोऽस्मि।
प्रोत्साहनं बुद्धिविवर्धनन्तु
पलेन चेयं प्रकरोति नान्या[6] ॥ इति ॥

पुनश्च आतङ्कवादः अस्मदीयसमाजेषु निन्दितसंगोष्ठी, यो विविधक्षयमूलकानि कार्याणि सम्पादयति। पुनश्च सुताडनेनापि न लज्जितो भवति। जगत्यस्मिन् चलदूरवाणी विश्वेषु विद्यमानातङ्कवादशमने शत्रुदमने उग्रशीलदेशशान्तकरणे शुभसन्धिकृते च प्रयत्नमाना भवति। युद्धकालिनपरिस्थितौ का अवस्था प्रचलिता? इति विषयं ज्ञातुमिच्छति चेत् दूरवाणीमाध्यमेन वार्तालापं कर्तुं शक्यते। तथा च ब्रूते—

विश्वे प्रसिद्धः सुसमृद्धदेश-
श्चामेरिका वान्यविशालदेशः।
शत्रौ रणे सङ्कटघोरकाले
प्रतीक्षते भारतदूरवाणीम्[7] ॥ इति ॥

पुनश्च

आतङ्कतापशमने दमने च शत्रोः
कस्यापि शान्तकरणे भुवने च नित्यं।
को वा करोति शुभसन्धिकृते प्रयत्नं
देशो ममैव सततं मम दूरवाणी[8] ॥ इति ॥

झ. जाति-वर्णभेदप्रथानिवारणम्

वैचित्रं मानवसभ्यतायाः अपरमेकविशेषणम्। आङ्ग्ल-हिन्दी-बङ्ग-तेलेगु-माराठ्यादिभाषागतकारणात् हिन्दु-मुस्लिम-जैन-शिखादिधर्मत्वात् बङ्ग-अन्ध्र-विहार-राजस्थानादिप्रदेशगतकारणात् भारत-पाकिस्थान-आमेरिकादिदेशगतकारणात् इतोऽपि इत्थं रूपं उच्चावचकारणत्वात् मानवसमाजे वैचित्रता प्रभेदश्च अवलोक्यते। एवं रूपं सर्वं प्रदेभं विभेदञ्च निर्मलयितुं शक्नोति चलदूरवाणी। प्रसङ्गेऽस्मिन्नवलोक्यते यत्—

हिन्दूजनैर्यीशुजनैश्च सिक्खै-
र्मोहम्मदैश्चाखिलभारतीयैः।
सर्वैः सहेयन्तु समानभावैः
प्रवर्तते योजयतीव सूत्रे[9] ॥ इति ॥

इतोऽपि चलदूरवाणी अस्मान् अनेकविधकार्यं कर्तुं साहार्य्यं करोति। यथा- Camera, Calculator, Wi-Fi इत्यादयः।

- चलदूरवाणी अस्माकं जीवनं सुलभं द्रुततरम्, अधिकं कार्यकुशलं च करोति। सम्यक् उपयोगेन चलदूरवाणी अस्मान् उत्तमं समृद्धं च भविष्यं निर्मातुं साहार्य्यं करोति।
- चलदूरवाणी प्रियपत्नीवद् तथा च सदा सुखं प्रदीयते अस्मभ्यम्।
- कदाचित् हृदि नूतनं भावं वार्तां वा सूचयति, मनसि विविधविषयानां कुतूहलम् आकर्षणमुत्पादयति, प्रसन्नतां समुत्पादयति, सुरम्यशब्दैः सुरम्यध्वनिभिः च अस्मान् मोदयति। अतः दूरवाणी अस्माकं परममित्रं च नित्यप्रयोजनीयद्रव्यं भवति। तथा चोक्तम्—

भावं नवं सा हृदि सूचयन्ती
कुतूहले वा मुदि पातयन्ती॥
सुरम्यशब्दैरपि मोदयन्ती
ममास्ति मित्रं मम दूरवाणी[10] ॥ इति ॥

- समयं सूचयति, स्वदेशे देशान्तरे च कदा अहं कुत्रास्मी इति सम्यक् ज्ञापयति एषा चलदूरवाणी। सम्प्रति जनाः दूरवाण्याः ध्वनिसंकेतेन उत्तिष्ठन्ति, अतः समयस्य संकेतं करोति, बन्धुवत् मामुपदिशति। तथा चोक्तं श्रीराधाकान्तठाकुरमहोदयैः—

6 चलदूरवाणी.,१६
7 चलदूरवाणी.,७३
8 चलदूरवाणी.,७४
9 चलदूरवाणी.-६०
10 चलदूरवाणी.-१०

International Journal of Pharmaceutical research and Applications
Volume 11, Issue 3, May-June2026, pp:1949-1954 www.ijprajournal.com ISSN:2456-4494

दिने निशायामथवा कदापि
संकेतकैः साधु विबोधयन्ती।
सखा कदाचिद् घटिकादियन्त्रं
ममास्ति सर्वा चलदूरवाणी[11] ॥ इति ॥

- जीवनकाले अस्माभिः कदापि अपरिचितव्यक्तिगणैः समं वार्तालापेन परिचयो लभ्यते, परन्तु कालचक्रे ते विस्मृताः, तत्सत्त्वेऽपि कस्मिंश्चित् समये कस्मिन्नपि स्थाने दूरवाण्या सरलतया तान् द्रष्टुं स्मर्तुञ्च अर्हामः।
- चलदूरवाणी कष्टे वियोगकाले वा अस्मभ्यम् आनन्दं स्नेहमयभावं कर्णसुखञ्च प्रयच्छति। अत एवं वक्तुं पारयामि यत् चलदूरवाणी समेषां जनानां समीपे प्रियतमा।
- चलदूरवाणीद्वारा निमेषेण चित्रं स्वीक्रियते, किञ्च तत्प्रयोजनीयपत्रम् अपरं प्रति प्रेषयितुं शक्यते।

चलदूरवाण्याः कुफलानि

चलदूरवाण्याः नैकानि कुफलानि सन्ति यत् तस्याः अत्यधिकप्रयोगत्वात् अस्माकं वहुमूल्यसमयस्यापचयो भवति, नेत्रयोः स्वास्थ्यस्य च विविधानि कुफलानि भवन्ति। अपि च दूरवाण्याम् अन्तर्जालसंयोगकारणात् अस्माकं व्यक्तिगतसूचना सुरक्षिता नास्ति। इतोऽपि बहूनि कुफलानि विद्यन्ते, तानि यथा—

क. व्यक्तिगतसूचनायाः असंरक्षणम्

चलदूरवाणीषु वयम् अस्माकं व्यक्तिगतसूचनान् यथा- दूरभाषसंख्या, इमेलसंकेतः इत्यादीन् संग्रहितुं शक्नुमः। यदि एषा सूचना अपहृता भवति तर्हि अस्माकं व्यक्तिगतगोपनीयतायाः उल्लङ्घनं भवितुम् अर्हति।

ख. महत्त्वपूर्णं कार्यं बाधते

कदाचित् तात्कालिककार्यस्य वा सभायाः समये आह्वानं वा चलदूरवाणीसूचना वा अस्मान् विचलितं करोति। तदतिरिक्तं दूरवाणीषु केन्द्रितत्वात् तात्कालिककार्यं नष्टं भवति।

ग. अतिरिक्तव्यवहारः

चलदूरवाण्याः अतिरिक्तप्रयोगाद् विविधाः शारीरिकाः मानसिकाः सामाजिकाः च समस्याः उत्पद्यन्ते। यथा—

शारीरिकसमस्याः—

- चलदूरवाण्याम् अतिरिक्तं वार्तालापेन अवसन्नता, शिरोवेदना च भवितुम् अर्हति।
- चलदूरवाण्याः निरन्तरम् उपयोगेन स्मृतिक्षयः भवितुम् अर्हति।
- चलदूरवाण्याः स्कन्धस्य कोणस्य कटिबन्दस्य च सन्धिः क्रमेण निष्प्रयोजनः भवितुम् अर्हति।

मानसिकसमस्याः—

- अत्यधिकं चलदूरवाण्याः उपयोगेन उपयोक्तृषु विविधाः मानसिकासमस्याः उत्पद्यन्ते।

सामाजिकसमस्याः—

- यानवाहनचालनकाले चलदूरवाण्याः उपयोगेन यातायातदुर्घटनानां सम्भावना वर्धते।

घ. निर्भरशीलता

चलदूरवाणी अस्माकं जीवनस्य अत्यावश्यकी अंशा अस्ति। वयं चलदूरवाणीद्वारा एतावन्त आश्रिता अभवाम यत् तया विना स्वजीवनस्य कल्पनां कर्तुं न शक्नुमः। एषः आश्रयः अस्मान् मानसिकरूपेण दुर्वलं करोति।

ङ. सामाजिकपृथक्करणम्

चलदूरवाणी अस्मान् सामाजिकरूपेण पृथक् कर्तुं शक्नोन्ति। वयं चलदूरवाणीषु एतावन्तः मग्नाः सन्ति यत् वयं परितः वास्तविकजगत् स्वविच्छेदं कुर्मः। पुनश्च चलदूरवाणीकारणात् परिवारमित्रेभ्यः विच्छेदाः भवामः।

च. नेत्ररोगसमस्या

दीर्घसमययावच्चलदूरवाणीव्यवहारेण नेत्रसमस्याः उत्पद्यन्ते। दृष्टिशक्तिह्रासः, नेत्ररोगप्रकोपश्च भवितुम् अर्हति। चलदूरवाण्याः नीलप्रकाशः नेत्रयोः गभीरं प्रवेश्य रेटिनाक्षतिं करोति। एतदतिरिक्ताः कर्णिकादिभागाः क्षतिग्रस्ताः भवितुम् अर्हन्ति। विरामशुन्यतया नियमितदीर्घसमयान्तं चलदूरवाण्याः उपयोगं करोति चेत् भवन्त्येते।

चलदूरवाणी एका शक्तिशालिनी यन्त्रविशेषा यद् अस्माकं जीवनम् अतीव सुलभं कर्तुं शक्नोति। तथापि तस्याः सौविध्यमसौविध्यञ्च सम्यगवगत्य व्यवहर्तव्यम्।

11 चलदूरवाणी.-१५

International Journal of Pharmaceutical research and Applications
Volume 11, Issue 3, May-June2026, pp:1949-1954 www.ijprajournal.com ISSN:2456-4494

उपसंहारः

उपसंहाररूपेण वक्तुं शक्यते यत् **"चलदूरवाणी"** अस्माकं जीवने बहु सुविधां कृतवती, संचारव्यवस्थायाश्चोन्नतिः अभवदनया। परन्तु क्षतिः अपि बहु भवति। किशोरवयस्काः स्वस्य चलदूरवाण्या उपयोगे एतावन्तः व्यस्ताः सन्ति यत् ते स्वपरिवेशस्य विषये ध्यानं न ददति। कुटुम्बस्य पितुः आर्थिकस्थितेः विषये अपि ते न चिन्तयन्ति। आवश्यकतानां पूर्तये मातापितृणामुपरि दुर्व्यवहारं कृत्वा परिवारे अशान्तिं वर्धयति। बालकानां नूतना प्रजन्माः देशस्य भाविनः कर्णधारयाः भविष्यन्ति। यदि ते एवं जीवन्ति तर्हि कः देशस्य निर्माणं करिष्यति? अस्माभिः अवश्यं स्मर्तव्यं यत् भारते अधिकांशजनाः दरिद्राः अशिक्षिताश्च सन्ति। प्रथमतया अस्माभिः तेषां विकासस्य विषये चिन्तनीयम्। जीवने अस्माकं लक्ष्यं वैज्ञानिकसूचनाप्रोद्योगिक्याः साहाय्येन देशस्य जनानां मुखयोः स्मितम् आनेतुं भवेत्, न तु चलदूरवाण्याः विलासितायाः विषये अन्धरूपेण आकृष्टाः भवेयुः।

॥ इति शिवम् ॥

सहायकग्रन्थसूची

१. *चलदूरवाणी।* राधाकान्तः ठाकुरः, राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः, आन्ध्रप्रदेशः; २०१०।
२. *अमरकोषः अमरसिंहविरचितः।* सम्पा० हरगोविन्द-शास्त्री, चौखाम्वा संस्कृत संस्थानम्, वाराणसी; २००६ (तृतीयं संस्करणम्)।
३. *हलायुधकोषः हलायुधविरचितः।* सम्पा० जयशङ्कर-जोशी, उत्तरप्रदेश-हिन्दी-संस्थानम्, लखनऊ; १९९३ (तृतीयं संस्करणम्)।
४. *अग्निपुराणम्।* व्याख्याता आचार्य-शिवप्रसाद-द्विवेदी, चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली; २००४।
५. *कालिदासग्रन्थावली।* सम्पा० रेवाप्रसाद-द्विवेदी, काशी-हिन्दु-विश्वविद्यालयः, वाराणसी; १९८६ (द्वितीयं संस्करणम्)।